International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 435-437
© 2021 IJSR
www.anantaajournal.com
Received: 23-10-2020
Accepted: 11-12-2020

डा0 वीना विश्नोई शर्मा
एसो0 प्रोफेसर–संस्कृत विभाग, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
उत्तराखण्ड, भारत

Corresponding Author:
डा0 वीना विश्नोई शर्मा
एसो0 प्रोफेसर–संस्कृत विभाग, गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
उत्तराखण्ड, भारत

# वेदेषु विविधचिकित्सापद्धतयः

डा0 वीना विश्नोई शर्मा

## प्रस्तावना

वेदः विश्वसंस्कृतेः आधारस्तम्भोऽस्ति। प्राचीनकालादेव वेदः मनुष्येभ्यः प्रकाशस्तम्भ इव दृश्यते। वेदेषु ज्ञान विज्ञानस्य अक्षयनिधिः विद्यते। अतः मनुना उक्तं– सर्वज्ञानमयो हि सः।[1] अर्थात् वेदे समस्त ज्ञान विज्ञानं निहितमस्ति आयुर्वेदाशास्त्रानुसारेण वेदस्य अनुशीलनेन ज्ञायते यत् चतुर्षु वेदेषु आयुर्वेदस्य विभिन्न अंगानानां विशदं वर्णनं कृतमस्ति।
वेदेषु विविधचिकित्सापद्वतीनां वर्णनं दृष्टिपथम् आयाति। आयुर्वेददृष्ट्या अथर्ववेद अत्यन्तमहनीयः ग्रन्थोऽस्ति। अस्मिन् आयुर्वेदस्य समस्तांगानां वर्णनमस्ति यथा– भिषक, भिषक्गुणाः कर्माणि.भैषज्यं, वशीकरणं, वाजीकरणं.रोगनाशकमणयः. विविधौषधीनां नामगुणकर्माणि.विभिन्नचिकित्सादयः।
अथर्ववेदे चतुर्विधचिकित्साविधीनां विवरणं लभ्यते [2]। आथर्वणी चिकित्सा. आंगिरसी चिकित्सा. दैवी चिकित्सा. मनुष्यजा वा मानवी चिकित्सा च।

आथर्वणी चिकित्सा – आथर्वणीचिकित्सा अथर्व ऋषिणा सह सम्बद्धा अस्ति। अस्मिन् चिकित्साविधि विषये अनेकेषां विदुषां मतं यत् शान्तियुक्तविधीना विधीयमाना चिकित्सा वर्तते। अथर्वा शब्दस्यार्थः योगी वर्तते, ध्यान– मनन–चिन्तन–मनोयोगेन या चिकित्सा भवति सा आथर्वणी चिकित्सा। अतः इमां मानसचिकित्साविधिं कथयितुं शक्यते। अत्र अस्यां मंत्रशक्ति–जप–पूजापाठ–आश्वासनाप्रक्रियया प्राणशक्तिः वर्द्धते रोगश्च विनश्यति [3]। प्रदीप्तमनोबलेन रोगाः नष्टाः क्षीणप्रायाः कियन्ते [4]। एषापद्धतिरेव आथर्वणी चिकित्सा उच्यते।

अंगिरसी चिकित्सा – अंगिरसी चिकित्सा अंगिरस वा अंगिराऋषिणा सह सम्बद्धा अस्ति। अस्याः द्वे व्याख्ये वर्तते–
'क'–गोपथशतपथब्राह्मणे अंगिरसशब्दस्यार्थः अंगानां रसः कृतः [5]। अंगानां रसैः या चिकित्सा भवति सा अंगिरसी। अस्यां अंगानां रस रक्तादीनाम् आरोपणं, शरीरे बाह्यरसानां, कार्यशीलतत्वानां, वृक्षवनस्पतीनां पोषकतत्वानां, अन्यशक्तिप्रेरकतत्वानां प्रापणम् उल्लिखितम्।
ख– अंगिरस शब्दस्य अपरा व्याख्या– कौषीतकिब्राह्मणे, शांखायन श्रौतसूत्रे, आश्वालयनश्रौतसूत्रे, छान्दोग्ये उपनिषदि च अंगिरसं घोरअंगिरसनाम्ना संबोधितास्ति [6]। अंगिराऋषिणा दृष्टमन्त्रेषु व्रणचिकित्सा, शत्रुनाशनं, शत्रुसेनानाशनं, मणीना समस्तरोगशत्रुराक्षसनाशनादीनां वर्णनं प्राप्यते। [7] ऋषिणां दृष्टिचिन्तनञ्च सत्यं एते सूक्ष्मदृष्ट्याश्च [8] भवन्ति।
अंगिरसविधिना शल्यक्रियापि कर्तुं शक्यते। अस्यां सूक्ष्मदृष्टि,कूर कृत्य–अंगछेदनक्षमता, रोगाणां ज्ञानम् आवश्यकम्।

दैवी चिकित्सा– पृथ्वी–अग्नि–जल–वायु–आकाशाश्च देवा उच्यन्ते। सूर्यचन्द्रादिदेवाः सन्ति। अतः मृतचिकित्सा, जलचिकित्सा, अग्निचिकित्सा, वायुचिकित्सा, सूर्यचिकित्सा, प्राणायामचिकित्सादयो दैवी चिकित्साः सन्ति। आधुनिक विज्ञानानुसारेण एषा प्राकृतिक चिकित्सा वा नैचुरोपैथी वर्तते।
मनुष्यजा मानवी चिकित्सा वा–एषा मानवनिर्मिता चिकित्सा। अस्यां मानवनिर्मितेन चूर्ण–अवलेह–भस्म–कल्प आसववाटिकादयः सम्मिमलताः सन्ति। एषा चिकित्सा औषधिचिकित्सा वर्तते। अतः इमं ड्रग थैरेपी वक्तुं शक्यते।

"दैवी चिकित्सायाः स्वरुपम्"
अथर्ववेदेन सह चिकित्सायाः सम्बन्धःअत्यधिकोऽस्ति परन्तु अन्येषु वेदेष्वपि एवम् अनेकप्रकाराः मन्त्राः दृश्यन्ते। ऋग्वेदे, यजुर्वेदे च अत्यधिकप्राकृतिकवस्तुभिः स्वास्थ्यप्राप्तेः निर्देशो वर्तते तथा औषधिषु प्राकृतिकवनस्पतीनाम् उल्लेखो प्राप्यते [9]। वेदेषु सूर्यचन्द्रं अ0वे06.83.1., अग्निं अ0वे0 6.10.1, मरुतं ऋ0वे010.186.1, रोगाणां नाशकः प्राकृतिकचिकित्सकरुपेण उक्तः। रसयोगसागरस्य उपोद्घातस्य पंचम पृष्ठे वर्णनम् अस्ति यत् वायु जलस्य क्रियाः औषधयः सन्ति।
अथर्ववेदस्य एकमन्त्रे सूर्यचन्द्रौ एकसार्धम् औषधरुपेण दृष्टौ [10]। यजुर्वेदे उल्लिखितं यत् समस्त सोमचन्द्रमा औषधीनां नृपोऽस्ति [11]। ऋग्वेदे सूर्यः सप्ताश्वः उक्तः [12]। सूर्यस्य सप्तरश्मयः अतिशीघ्रगामी भवन्ति अनेन ते सप्ताश्वाः कथिता। सूर्यस्य सप्तरश्मित्वस्य अयम् अभिप्रायः सूर्यप्रकाशस्य किरणाः रक्त–पीत–हरित–नारंगी–नीलश्वेताश्च एभिः सप्तरागैः निर्मिताः।

सूर्यप्रकाश–किरणाश्च अतितीव्रगतिकारणेन सप्तरागां भिन्नत्वेन न दृश्यन्ते।परम् एकश्वेतरागरुपेण दृश्यन्ते।

सूर्यकिरणैः रोगीणां चिकित्सकाः रोगानुसारेण भिन्नं–भिन्नं रागयुक्तजलपात्रे शुद्धजलं पूरयित्वा सूर्यप्रकाशे स्थापयित्वा पुनः रोगानुसारेण तस्य जलं रोगिणंपाययन्ति अनेन रोगी स्वस्थो जायतें अथर्ववेदस्येकस्मिन्मन्त्रे सूर्यकिरणाय गौ शब्दस्य प्रयोगः कृतः [13]। गौशब्दस्यार्थः यत्र सूर्यप्रकाशः भवति तत्र तस्य सामान्यार्थः गौ भवति तात्पर्योऽयम् यत् रक्तवर्णागोदुग्धसेवनेन पाण्डुरोगचिकित्सायां पूर्ण सहायता प्राप्यते। सूर्यकिरणैः या चिकित्सा भवति तस्य कृते वैदिकसाहित्ये आयुर्वेदे चोक्तं राक्षसः निशाचरः यातुधानाश्च ते सूर्यकिरणैः नष्टाः जायन्ते [14]। अथर्ववेदस्य एकस्मिन् मन्त्रे स्पष्टरुपेण सूर्यः कृमीणां हन्ता उक्तः [15]।

प्राचीनकाले कीटेभ्यः सुरक्षार्थं उष्णवस्त्रेषु चन्दनं,कूठं,कर्पूरं, देवदारुप्रयोगेण सह सूर्यप्रकाशस्य प्रयोगः प्रचलितम् आसीत्। साम्प्रतमपि एतत् सर्वं प्रयुज्यते।

आयुर्वेदे सूर्यइव अग्निकर्मणोऽपि विशेषमहत्वमस्ति अनेन असाध्यरोगाऽपि साध्याः भवन्ति।सुश्रुत अ012.3। हिरण्यकेशी गृह्यसूत्रेऽपि अग्निभिः रोगाः नष्टाः भवन्तीति प्रतिपादितम् [16]। अथर्ववेदस्य एकस्मिन्मन्त्रे उल्लिखितम् यत् यज्ञाग्निना क्षयाज्ञातरोगाः नश्यन्ति मानवः दीर्घायुषं च प्राप्नोति [17]। अग्निपुत्रः यज्ञाग्निः राजयक्ष्मारोगचिकित्सार्थं प्रयुज्यते। पूर्वकाले यज्ञाग्नि धूम्रेण राजयक्ष्मारोगस्य नाशो कियते स्म। वेदविहितं यज्ञम् आरोग्यकामाः रोगिणः कुर्वन्तु।चरक चि0अ0 8.186। अत्रिपुत्रः यज्ञाग्निधूम्रस्य विधानं वर्णयन् उक्तं यत् यज्ञाग्निः सुवासितवायुः यः समस्तभूमण्डले प्रसारयन् रोगक्रिमीन् नाश्यति।चरक चि0अ016,66। अथर्ववेदे अग्निं रोगोत्पादकक्रिमीणां विनाशकः तथां तेषां भस्मकर्ता प्रोक्तः [18]। ऋग्वेदस्य एकस्मिन् मन्त्रे विश्वभ्येषजः प्रोक्तः [19]। ऋग्वेदे अग्निं सम्बोधयन् उक्तम् अग्निः जीवनशक्ति सामर्थ्यपुष्टिञ्च ददाति [20]। यथा वात्सल्ययुक्तपिता स्वं पुत्रं संरक्षति तथैव अग्निस्वरुपपितरम् ऋग्वेदस्य ऋषिः स्व स्वस्थजीवनसंरक्षणाय नम्रतापूर्वकं प्रार्थनां करोति [21]।

सूर्यचन्द्रइव जलस्यापि प्राकृतिकचिकित्सायां विशेषमहत्वमस्ति। यजुर्वेदे उल्लिखितमं यत् यथा सोमः औषधीनां नृपोषस्ति तथैव जलस्य स्वामी वरुणः चिकित्सकानामपि चिकित्सकोऽस्ति [22]। कस्मै औषधये कतमं दिव्यमधुरजलं भवेत् अस्य वर्णनमपि यजुर्वेदे उपलभ्यते [23]। अस्मभ्यम्जलेन निरन्तरं प्राणं, जीवनं, बलं, रोगनिवारकशक्तिं,आरोग्यं सुखञ्च प्राप्यते [24] एवम् आर्याणां वैदिकसंध्यायां जलमाचमनेन ईश्वरस्य स्तुतेःवर्णनमस्ति [25]। यजुर्वेदे उल्लिखितम् यत् मनुष्येभ्यः उत्तमगुणयुक्तौषधियुक्तः सोमरुपः हविः अस्ति तथा यः जलमाध्यमेन सिध्यति, हे ईश्वर! तं सुसम्पन्नं सोमं मेघानां जलैः सिञ्चतु। [26]

औषधिबपनान्तरं जलस्य आवश्यकता भवति। अतः सामान्यजलं पातनेन सामान्यगुणयुक्ता भवति। अतः अहम् औषधी उन्नमजलेन सम्यक्रुपेण वपामि [27]। सुश्रुतं जलस्य दुर्गन्धं दूरीकृत्य उन्नमजलं निर्मापयितुं वनस्पतीनां प्रयोग वर्णनं लभ्यते [28]। यजुर्वेदस्य विंशति अध्यायस्य एकोनविंशतिसूक्तं तु पूर्णतया जलचिकित्सा विषयेऽस्ति।

अथर्ववेदे जलचिकित्साविषये उल्लिखितम् यत् जलैः हृदय– नेत्ररोगः निवार्यते, अनेन पादपीड.ाऽपि दूरीभवति। [29] जलेषु बाणेन क्षतव्रणं पूरयितुम् अपारशक्तिः वर्तते [30]। जलैः असाध्यरोगाः यक्ष्मादयोनष्टाः भवन्ति। अ0वे016.2.25। अथर्ववेदस्य पंचमकाण्डे 'वरुणः पायोऽधिपतिः' शब्दस्यार्थ एषोऽस्ति यत् जलं चिकित्सकानां स्वामी वर्तते जलं विना औषधीना। प्रयोगकार्यं इति असम्भवम् [31]। ऋग्वेदेऽपि स्पष्टरुपेणलिखितं यत् जले अमृतमौषधिश्चास्ति [32]। सूर्य– अग्नि जलमिव वातस्यापि प्राकृतिकचिकित्सायाम् विशेषं योगदानमकस्त। मातरिश्वा वातस्य देवता वर्तते। उपनिषदिऽपि उक्तं वातएव प्राणेभूत्वा शरीरे तिष्ठति।

'वायुर्ह वै प्राणें भूत्वा शरीरमाविशात्' वातो रोगविनाशक आयुवर्धकश्च मन्यते' उक्तं च वेदे भेषजयुक्तवातः हृदये, वक्षस्थले, शरीरभागे प्रकवस्स रोगान् विनाश्य आयुषं च वर्धयेत् [33]। वस्तुतः शुद्धवायुः स्वयमेव रोगनिवारकौषधरूपोऽस्ति [34]। ऋग्वेदस्य ऋषिः वायुसंबोधयन् कथयति हे वायो! स्व औषधमानयतु इतः समस्तरोगदोषान् अपवारयतु त्वमेव समस्तऔषधयुक्तोऽस्ति। वेदेषु वायुः प्राण, अपान, व्यान समान, उदानभेदेन वर्णितः [35]। वेदे प्राणापानेभ्यः कथितं यत् प्राणः 'पुरोवात्' शरीरे बलं प्रेषयति, अपान 'पश्चातवात 'शरीरात् पापरोगान् च बर्हि निस्सारयति [36]। गीतायां प्राणापानौ नियन्त्रयितुं प्रोक्तम्–प्राणापानौ समौकृत्वा नासाभ्यन्तरचारिणौ कश्चित् योगी अपाने प्राणस्य यज्ञं करोति अन्यः प्राणे। गी05. 26 अपानस्य यज्ञं करोति अर्थात् प्राणायामेन वायुम् अवरुध्य प्राणापानं अवरोधयति [37]। अथर्ववेदे भणितं–येन औषधि–गुग्गुलयुक्त सुगन्धितवायोः सेवनेन यक्ष्मास्पर्शजन्यरोगाः नष्टाः भवन्ति [38]।

एतद् महत्वपूर्णं कथनमस्ति यत् इयम् आथर्वणी आंगिरसी मानुषी चिकित्सया केनापि औषधिना वनस्पतिनां मणिविशेषेन मानवस्यकमेकमरोगं निवारयतुं शक्यते परन्तु दैवीमानसीचिकित्सया– सूर्य– अग्नि–वायु–जलमादि साहाय्येन सानिध्येन च मरनवाः–'सर्वे सन्तु निरामयाः'–इमां वेदोक्तिं चरितार्थं कुर्वन् स्वस्थ–दीर्घजीवनस्यधिकारिणो भवितुं शक्नुवन्ति [39]। एषु एकस्यापि अभावेन सुख स्वस्थमानवजीवनस्य परिकल्पना असम्भवा।

''मन्त्र चिकित्सा''

मन्त्र चिकित्सा ध्वनितरंगचिकित्सा अस्ति। मन्त्रेभ्यो या ध्वनयः निर्गच्छन्ति ताः तरंगरूपेण उपरि गच्छन्ति, सूर्यस्य सूक्ष्मशक्तिम् आत्मसात्कृत्य साधकस्य शरीरे प्रविशन्ति। एताषां शक्तीनां प्रभावेन शरीरस्य रोगाः दूरीभवन्ति। संगीतेऽपि एषा शब्दशक्तिः कार्यं करोति। आधुनिक वैज्ञानिकाः संगीतस्य साहाय्येन मानवानां पशूनाञ्च अनेकरोगाः दूराकृतवन्तः। डा0 एडवर्ड पोडोलास्की महोदयानुसारेण संगीतेन रक्तसंचालनं प्रभावितं शिरासु च नवजीवनं संचारयति अनेन अभ्यासेन आमाशयस्य ष्दयस्य च रोगाः न भवन्ति।

मन्त्रशब्दस्य व्युत्पत्तिः ज्ञानार्थक मन् धातोः ष्ट्रन् प्रत्ययेन भवति यस्य शाब्दिकार्थः भगवत् आदेशानां ज्ञापक उक्तञ्च मन्यते ज्ञायते वा ईश्वरादेश अनेन इति मन्त्रः। केचन् विद्वांसः मन्यन्ते यत् विचारार्थकमन् धातोरमपि मन्त्रशब्दः सिध्यति अस्यार्थः भगवदादेशानां विधिपूर्वकं विचारं चिन्तनं मननञ्च। सत्कारार्थकमन् धातोरपि मन्त्र शब्दः निर्मीयति देवतानांसत्कारं पूजां पाठादिविधिविशेषं मन्त्र उच्यते। प्रोक्तः– सत्क्रियते देवता विशेष अनेन इति मन्त्रः अनेन प्रकारेण मन्त्रस्य तिस्त्रः व्युत्पत्तयः प्रतिपादिताः। एभिः व्युत्पत्तिभिः मुख्यलक्षणां ज्ञानं ज्ञायते।

1. इदं किमपि साधारणं विधानं नास्ति परन्तु भगवत आदेशः वर्तते।
2. अनया उचितरीत्या विचारकृता तथा चिन्तनमनन प्रक्रियायाः उत्तमं फलमस्ति।
3. एतदिरिक्तं गूढ.ज्ञानकारणेन सतत् गुप्तकथनमपि उच्यते एतां वैदिकभाषायां ऋचोऽपि प्रोक्ताः।

ऋग्वेदे अथर्ववेदे च मन्त्रशक्तिः वर्णिता। ऋग्वेदस्य कथनमस्ति यत् मन्त्राः तेजोमयाः ये रोगाणां रोगकीमीणाञ्च नाशकाः सन्ति [40]। वेदमन्त्रेषु इन्द्रादिदेवानां वासः वर्तते [41]। गायत्रीमन्त्रे अमृतस्य बीजमस्ति [42] गायत्री मन्त्रो वरदावेदमाता प्रोक्ता तथा तस्य तपेन दीर्घायु– प्राण–प्रजा–कीर्ति–द्रविणादीनां प्राप्तिर्भवति [43]। मन्त्रशक्तिभिः देवा असुरान् पराजितवन्तः [44]। अग्निः मन्त्रशक्तिमाध्यमेन रोगकृमीन् नाशयति [45]। अथर्वाऋषिः मन्त्रविद्या विशेषज्ञाः प्रोक्ता। तस्य शिरसि दिव्यशक्तिनां भण्डारमस्ति [46]।

मन्त्राणां सस्वरपाठेन सूक्ष्मध्वनितरंगाः उत्पद्यन्ते। ते शरीरं मनश्च पुष्यन्ति अनेन शरीरे विद्यमानदूषिततत्वानि नश्यन्ति। अनेन ज्ञायते यत् मनुष्यः मानसिकरोगाद् शिररोगस्नायुरोगादपि मुक्तः भवति। मन्त्रशक्तिः दुर्विचारान् नाशयति अतः मनः शुद्धं पवित्रञ्च तिष्ठति [47]। मनसः पवित्रतया मानसरोगः स्वयमेव शान्ते भवति। मन्त्रचिकित्सा एषा अद्भुतचिकित्सा अस्ति। अस्मिन् शब्दशक्तिसंगीतस्य च समन्वयः तिष्ठति। अतः अस्य गुणवत्ता वर्द्धते।

वेदेषु मन्त्रचिकित्साविषये विस्तृत वर्णनं प्राप्यते। भिन्न–भिन्नरोगेभ्यो मन्त्रचिकित्सायाः विधानं सम्पादितम्। अर्विवेदे विघ्ननिवारणाय 'इन्द्रेण दत्तः' इति मन्त्रजपस्य विधानं कृतम् [48]। 'मुञ्चामि त्वा' अनेन मन्त्र जपेन अपमृत्युभयात् मुक्तिः प्राप्यते। [49] 'यमस्य लोकात्' इत्यादि मन्त्रजपैः दुस्वप्नरोगाश्च नश्यन्ति। [50] अनेन प्रकारेण ऋग्वेदे यजुर्वेदेचापि रोगनिवृत्तये अनेकमन्त्राणां विधानं प्राप्यते। [51] वेदानामनुसरणं कुर्वन् अग्निपुराणेऽपि रोगनिवृत्तये अनेक पौराणिकमन्त्राणां विधानमुपलभ्यते [52]।

केनापि लिखितम् यत् ओइम् महौषधिर् अस्ति। ओइम् नामस्मरणमात्रेण मनुष्यः दैविक–दैहिक– भौतिक कष्टात् मुच्यते। विष्णुसहस्त्रनाम जपमात्रेण समस्त रोगात् विमुक्तिर्भवति।

आधुनिकविज्ञानदृष्ट्या सस्वरमन्त्रोच्चारणेन वायुमण्डले ध्वनिकम्पनं जायते। एतत् ध्वनिकम्पनस्य परीक्षणं भौतिकविज्ञानविद्वद्भिः वैाानिकमतैः अयं निष्कर्षः प्रतिपादिताः यत् मन्त्रैः वायुमण्डले वायुषु तरंगाः उत्पद्यन्ते। एभिः ध्वनितरंगैः रुग्णेन स्वास्थ्यलाभः क्रियते। पाश्चात्यवैज्ञानिकदृष्ट्या मन्त्राणां वैज्ञानिकप्रयोगाः विभिन्नरुग्णेषु कृताः। अनेन सफलताऽपि प्राप्ता। उँचीफ्रेक्वीध्वनेः प्रयोगं मांसपेशीनां पीडाशमनार्थम् अकरोत् येन् रुग्णः स्वस्थः जातः मानसव्याधिपीडितरुगणेषु ध्वनीनां लाभाः अधिकाः सन्ति। अस्याः चिकित्सायाः प्रयोगः डा0पेटर लिडस्ट्राय महोदयः 'यूथ कालेज आफ मैडिसन' चिकित्सालये

192 रुग्णान् प्रावेषितवान्। एतान् रुग्णान सम्पूर्ण चिकित्सापद्धतिभिः असाध्याः घोषिताः। एतेषां रुग्णानां चिकित्सा तेषां मस्तिष्के संगीतधारा प्रवाहिता। यस्य फलस्वरुपं 138 रुग्णाः लाभान्विताः।

अल्बर्ट आइन्सटाइन कालेज आफ मैडिसिन विभागस्य चिकित्सकैः ध्वनितरंग सहायताभिः निदानकरणे सफलताः प्रसप्ताः संगीतध्वनीनां प्रयोगमपि मानसरुग्णेषु अमेरिका वास्तव्यैः चिकित्सकैः कृतम्। एते रोगिणः असाध्याः सिद्धाः परन्तु तस्मिन् तेन सफलता प्राप्ता।

अनेन प्रकारेण अथर्ववेदे मन्त्रचिकित्सा एका दिव्या चिकित्सा वर्तते। अध्यात्म शक्तिभिः पूर्णमन्त्राणां जपपाठश्च उत्पन्नोर्जितध्वनितरंगाः मनोमयप्राणमयशरीरं स्वस्थं कुर्वन् स्थूलशरीरं उत्पन्नान् विविधरोगानपि उपशमति। मन्त्रेषु प्रतिबिम्बितसंकल्पशक्तिरपि रोगान् दूरीकर्तुं शक्नोति। मन्त्राणांजपं कुर्वन् यदा चित्तं समाहितं भवति तदा स्वस्थचित्तं योगस्थं योगरूढं वर्तते। योगस्थितिर् एव स्वरुपस्थिति अस्ति विकृतचित्तन्चैव अस्वरुपस्थितिर् अस्वस्थता वा वर्तते। मन्त्रप्रतिपादितो उदात्तभाव शुभसंकल्पेनैव अस्माकं मनोगतदंर्विचारान् दूरीकृत्य मनशरीरन्ध्रासु स्वस्थं भवति।

अतः स्पष्टयत् वेदोक्त मानसिकप्राकृतिक चिकित्सायाः महत्ता अतीत वर्तमान–भविष्ये सर्वदा स्थास्यति।

निस्संदेहः – वेदेषु मानसिकचिकित्सायाः स्वरुपमस्ति सुन्दरतमम्।
ऋषिमुनयोः चिन्तनमिव ये वेदानामुपहारं परमम्।
मानवस्य उपचारयति साधनं प्रकृतेः रमणीयतमम्।
ज्योतिर्मय स्व मानसेन नरतनं करोति उज्जवलतमम्।।

पादटिप्पणी

1. मनुस्मृतिः 2/7
2. अथर्ववेद 11/4/16
3. प्रणो वा अथर्वा। शत0ब्रा0 6/4/2/1
4. येऽथर्वाणस्तद् भेषजम्। गो0 ब्रा0 1/3/4
5. सर्वेभ्योऽङ.गेभ्यो रसोऽक्षरत्, सोऽङ.गरसोऽभवत्, तं वा एतमं अंगरसं सन्तम् अंगिरा इत्याचक्षतें गोपथ पूब्र 1ऽ7, अंगिरसोह्गंगानां हि रसः। शत0ब्रा014/4/1/9
6. घोर अंगिरसोह्मर्ध्वयुः। कौषीतकि ब्रा0 30–6। आश्व श्रौत 10/7/4। शांखयन श्रौत 16/2/12। छां0 उप03/17/6
7. अथर्व02/3, 7/77, 7/90, 19/34, 35
8. घोरा ऋषयो नमो अस्त्वेभ्यः। चक्षुर्यदेषां मनसश्च सत्यं।।
9. आयुर्वेद का वृहत् इतिहास। अत्रि विद्यालंकार,पृ020
10. अपचित् प्र पतत सुपर्णो वसतेरिव। सूर्य कृणोतु भेषजं जन्द्रमावोऽपोच्छतु।अथर्व0 6/83/1
11. भेषजं स्वाहा सोमाय''''''''''सूत्रमाणं सविस्तारं वरुणं।य0वे0 21/40
12. ऋ0वे0 5/46/6
13. अनु सूर्यमुदयतां हृदधोतो हरिमा च ते।
गो रोहितस्य वर्णेन तेन त्वां परिदध्मसि।। अ0वे0 1/22/1
14. सूर्योविद एति पुरो रक्षांसि निर्जुवन।। अ0वे0 6/52,सम्पूर्ण सूक्त
15. उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन हन्तु रश्मिभिः।अ0वे0 2/32/1
16. न सूर्यस्य संदृश्यो मा मुमोक्षाः।ऋ0वे0 2/33/1
17. अ0वे0 3/11/1
18. सर्वेषां च क्रिमीणां सवौसां च क्रिमीणां।
भिनदमचश्मना शिरो दहाम्यग्निनामुखम्।। अ0वे0 5/23/13
19. अग्निं च यशमुबमापश्च विश्वभेषजी। ऋ0वे0 1/23/20
20. स धा विश्वचस्ते ददाशति सीमधा जरतवेदसो।
सो अग्ने धते सुवीर्यं स पुष्यति।।ऋ0वे0 3/10/3
21. स नः पितेव सूनवेऽग्ने सुपायनो भव सचस्वा नः स्वस्तये।ऋ0वे0 1/1/6
22. भेषजं स्वाहा सोमापः''''''''''सुत्रमाणं सविस्तारं वरुणं।। य0वे0 21/40
23. सवादी त्वा स्वादुना''''सुत्राम्णे पन्चस्व। य0वे0 16/1
24. य0वे0 6/6
25. ओझ्म् शन्नो देवीरभिष्टये आपो भवन्तु पीतये।
शंयोरभिस्त्रवन्तु नः।।य0वे0 16/12
26. परीतो सिन्चता सुतं सोमो यः उत्तमं हविः।
दधन्वान यो नर्यो अप्स्वन्तरा सुषाव सोमद्रिभिः।।य0वे0 16/11
27. देवस्य त्वा सवितुः''''''''प्रच्यन्ताम।।य0वे0 1/21
28. सादनं य कर्तव्यं''''''''नीमति।। सुश्रुत अ0 4/12
29. अ0वे0 सम्पूर्ण सूक्त
30. वरुणोऽपातधिपति स भवतु''''''''''कर्मव्यास्योपुरोधाः।अ0वेव 5/24/4
31. आप इन्द्र3भेषजीरापो''''''''''कृण्वन्तु भेषजम्।।ऋ0वे0 10/136/6
32. वात आवातु भेषजं''''''''आयुषिं तारिषत्।ऋ0वे010/186/1
33. द्वा विभौ वातो''''''''वात यद्रपः।ऋ0वे0 10/136/2
34. आ वात वहिं'''''''' दूत ईयसे।।ऋ0वे0 10/136/3
35. को अस्मिन् प्राणं''''''पुरुषे। अ0वे0 10/2/13
36. धान्यमसि धिनुहि''''''''महीना पयोसि।। य0वे0 1/20
37. अपाने जुह्वति''''''''''प्राणायाम परायणः।।श्रीमद्0 4/26
38. न तं यक्ष्मा अरुन्धते''''''''अश्नुते। अ0वे0 16/38/1
39. पश्येम शरदः ''''''''''शरदः शतात्।य0वे0 3/24
40. द्युमद्मीवचातनं रक्षोहा।ऋ0वे0 7/8/6
41. यस्मिन् इन्द्रो वरुणो ''''''''''''देवा ओकांसि चकिरे।ऋ0वे0 1/40/5
42. अन्तर्गायन्त्याममृतस्य गर्भे।अ0वे0 2/33/20
43. स्तुता मया वरदा वेदमाता''''''''''आयुः प्राणं।अ0वे0 19/71/1
44. येनासुरॉ अभि देवा असाम' ।ऋ0वे010/53/4
45. अग्रिष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्। ऋ0वे0 10/162/2
46. तद् वा अथर्वणः शिरो देवकोशः समुज्जितः। अ0वे0 10/3/27
47. अनागसं ब्रह्मणा त्वा कृणोमि।अ0वे0 2/10/1
48. अ0वे0 2/29/4
49. अ0वे0 3/11/1
50. अ0वे0 19/56/1
51. ऋ01/99/2,10/164,1/50/10 यजु0 13/20,35/18,23/16
52. अग्नि पु0 121/14,151/16–22,157/1–6